नं. पु० ३६

हस्तामलकम् (स्तोत्रम्)

श्री शंकराचार्यः

पत्र. ६ ——— सं. ५

विषय. वेदान्त शास्त्रम्

हस्तामलकस्तोत्रम् टीका सहितम्

प० ३६

5036

F. = 6

ॐ ॐनमःपरमात्मने ॥ ॥ कस्त्वंशिशोकस्यकुतोसिगंताकिंनामतेत्वंकुतआगतोसि एतन्म
१ द्वदत्वंममसुप्रसिद्धंमत्प्रीतयेप्रीतिविवर्धनोसि १ नाहंमनुष्योनचदेवयक्षौनब्राह्मणक्षत्रियवै
श्यशूद्राः नब्रह्मचारीनगृहीवनस्थोभिक्षुर्नचाहंनिजबोधरूपः २ स्पष्टार्थः मनआदीनां
मनश्चित्ताहंकारबुद्धीनांचतुर्णामंतःकरणानांतथाचक्षुस्त्वग्घ्राणजिह्वानांपंचज्ञानेंद्रियाणां

निमित्तंमनश्चक्षुरादिप्रवृत्तौनिरस्ताखिलोपाधिराकाशकल्पः

रविर्लोकचेष्टानिमित्तंयथायःसनित्योपलब्धिस्वरूपोहमात्मा ३

प्रवृत्तौव्यापारेनिमित्तंहेत्वर्थः सोहमात्मेतिसंबंधः नित्योपलब्धिस्वरूपंयथारविरादित्योयथालो
कानांयथायेनप्रकाशत्वेनलोकानांचेष्टायांपरिस्पंदेनिमित्तंतथाचाधिष्टातृत्वेनयोनिमित्तंसो
हमात्मेत्यर्थः इयंहष्टिरात्मनानोपाधित्वेनदर्शितापरमार्थतस्तुनिरस्तानिराकृताअखिलोपाधि

शेषाउपाधयोबुद्ध्यादिलक्षणा यस्य सतथोक्तः निरस्ताखिलोपाधिः आकाशकल्पः आकाशवद्वि
शुद्धोयः सोहमात्मेति संबंधः २ ननु मनश्चक्षुरादिप्रवृत्तौ किमर्थमधिष्ठानेष्यते स्वयं कस्मान्नप्रवर्त्त
न्ते कथंच नित्योपलब्धिस्वरूपत्वमधिष्ठातुरित्यतआह ॥ यंनित्यबोधस्वरूपं आत्मानमाश्रित्य म
नश्चक्षुरादीनि प्रवर्त्तन्ते सोहमात्मेति संबंधः अग्न्यौष्ण्यवदिति यथाउष्णत्वमग्नेर्नातिरिच्यते नव्य

यमग्न्यौष्ण्यवन्नित्यबोधस्वरूपं मनश्चक्षुरादीन्यबोधात्मकानि

तिरिक्तं हि कदाचिदग्नितोन्यतोप्युपलभ्यते यथाउष्णोदकेन नचैवमस्ति तस्मादग्निरूपत्वमेवो
ष्णत्वं एवमात्मनोपि चेतना स्वरूपमित्यर्थः यथोक्तं मनश्चक्षुरादिप्रवृत्तौ किमर्थमधिष्ठानेष्यते
स्वयं कस्मान्नप्रवर्त्तन्ते इत्यतआह अबोधात्मकानीति हेतुगर्भितमिदं विशेषणं ततश्चायमर्थो
भवति अबोधकत्वादचेतनत्वाद् घटादिवत् चेतनाधिष्ठातारमाश्रित्य प्रवर्त्तन्ते अचेतनत्वं चैषां

ज्ञेयत्वादिघटादिवत् श्रुतिश्च नान्यतोऽस्ति द्रष्टेत्यादिना आत्मव्यतिरिक्तचेतनत्वं प्रतिषेधयति
अतो युक्तं चतमात्मानमाश्रित्य प्रवर्त्तते इति निस्तरंगं निःसंशयमित्यर्थः तथा च श्रुतिः भिद्य
ते हृदयग्रंथिश्छिद्यंते चास्य संशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे एकं तु नाना शरीरे
यद्येक एवात्मा एकं तु नानात्वं नापरिकल्पितमेवेदं नानाभूतमित्यर्थः न ह्यात्मन एकत्वे

प्रवर्त्तत आश्रित्य निष्कंपमेकं समनित्योय ४

सुखदुःखादिव्यवस्थानं स्यात् तथा सर्वशरीरे यद्येक एवात्मा भवेत् तर्हि एकस्मिन्सुखिनि स
र्वे सुखिनः प्रसज्जेरन् तत्र सर्वत्राविशेषत्वात् एवमेकस्मिन् दुःखिनि सर्व एव दुःखिनो भवेयुः
एवमेकस्मिन्ज्ञाते सर्व एव ज्ञाताः स्युः तथैकस्मिन् जायमाने म्रियमाणे वा सर्व एव जायेरन्म्रियेरन्
इत्येकस्मिन् बद्धे मुक्ते वा सर्व एव बध्येरन्सर्व एव मुच्येरन्निति नचैनमस्ति तस्मान्नैक आत्मा

अतआह मुखाभासकः प्रतिबिंबो दर्पणजातो नानाप्रकारेषु दर्पणेषु स्थितियावत् परमार्थमुख
स्वरूपात् पृथक्केन भेदो नैवास्ति वस्तु यद्यपि मुखाभासको नाम वस्तुतोऽस्त्येव न तथाप्युपाधिभेदात्
यथा परमार्थसतो मुखात् परस्परं च ते मुखाभासका भिन्नाः प्रतीयन्ते तथा चोपाधित्वात् सर्वतो म
लिनत्वादिधर्माः प्रतीयंते तद्वत् मुखाभासकवत् चिदाभासकश्चात्मप्रतिबिंबो धीषु दृश्यमानो जी
व उच्यते यः सोऽहमात्मा जीवास्ते उपाधिभेदाद्भिन्नाः प्रतिभासंते उपाधिगतसुखदुःखादितत्त्व
मुखाभासको दर्पणे दृश्यमानो मुखत्वात् पृथक्केन नैवास्ति वस्तु चिदाभासको धीषु जीवोऽपि त
सुखदुःखादिमान् प्रतीयन्ते उपाधयश्च व्यवस्थिताः तत एवेति सुखदुःखादीनामेकात्मपक्षेऽव्यवस्था
युक्तैवात्मभेदः किंचनेति अतः साधूक्तमेकत्वमिति नचेदं सत्यात्मनस्तावत् सुखदुःखादिसंबंधा
भावान्मोक्षाभावः शक्यते व्यवस्थापयितुं श्रुतिश्चैकात्मानमेव प्रतिपादयति एकमेवाद्वितीयं ब्रह्मे
त्यादि भेदं प्रतिहेतुर्नास्ति बद्धो हि मुच्यते इति चिदाभासकस्यापि बंधमोक्षौ न विद्येते वस्तुत्वात् तथा
मुक्तेऽपि चिदाभासका ह्यंशतो नाशो रभावः ५

उं

ह स्ता टी ३

ततश्च मोक्षशास्त्रमनर्थकमापन्नमित्याह यथादर्पणस्याभावे सति आभासस्य मुखप्रतिबिंबस्य हानौ सत्यां मुखं परमार्थकल्पनाहीनं मिथ्याज्ञानरहितं एकमेव परं विद्यते तथा तेनैव प्रकारेण धी वियोगे बुद्धेरभावे सति निराभासको निष्प्रतिबिंब परमार्थः सन्नेक एव यः सोहमात्मा तस्मान्न

यथादर्पणाभावआभासहानौमुखंविद्यते कल्पनाहीन मेकं तथाधीवियोगेनिराभासकोयःसनित्योप ६

मध्यस्येति ततश्च तन्तु ख दुःखादिकमात्माध्यस्यतीति सोयमात्मसंबंधः आत्मज्ञानानुभूतिः अज्ञाननिवृत्त्या बुद्ध्यादिप्रपंचनिवृत्तावध्याससतिवर्धते मोक्षः नपुनः पारमार्थिको मोक्षबंधोकस्यचिद्विद्येते इतिसर्वे मीमांसकाः केचित्खलुदेहात्मवादिनो देहमेव मात्मा नं मन्यंते तानत्याह ६

मनआदेश्चक्षुरादेर्वियुक्तः पृथग्भूतः सोहमात्मेतिसंबंधः मनश्चक्षुराद्युपपादनानंतर्गतत्वात् शरीर
मप्युपादृष्टव्यं एतेनशरीरादयोवियुक्तमितिलभ्यते कथं मनश्चक्षुरादेर्वियुक्तोतआह मनइत्यादिअय
मात्मा मनश्चक्षुरादिकस्यप्रकाशस्य मनश्चक्षुरादिरिव मनश्चक्षुरादिःप्रकाशस्यगुणयोगात् अय
मर्थः यथाबाह्यस्यघटपटादेःप्रकाशको मनश्चक्षुरादिस्ततोन्यः तथाचांतरस्यापि मनश्चक्षुरादेः
मनश्चक्षुरादेर्वियुक्तः स्वयंयो मनश्चक्षुरादेर्मनश्चक्षुरादिः मनश्चक्षुरादेरगम्यस्वरूपः सनि ७
प्रकाशकः आत्मा अतोव्यतिरिक्तोनिश्चीयते अतएवमनश्चक्षुरादीनां नात्मत्वमितिसिद्धं ज्ञेयाद
न्योहिज्ञाताभवति नह्यात्मनोपिज्ञेयत्वात् अनात्मत्वप्रसंगेन अतआह मनश्चक्षुरादेरगम्यस्वरूपः
तथाचश्रुतिः यतोवाचोनिवर्तंतेअप्राप्यमनसासहेति ननुयद्यात्मा मनश्चक्षुरादेरगम्यः
कथमस्यसिद्धिः घटपटादेर्हि मनश्चक्षुराद्यधीन दृष्टं ततआत्मापितदधीनसिद्धियुक्तः ७

हस्ता
४

अथ तदधीनसिद्धिर्न भवति तदासिद्धिरेव न स्यात् शशकविषाणवदित्याह यइति स्वतःसि
द्धत्वमाह स्वतःस्वयमेव नपरतः शुद्धं निर्मलं च चेतो यस्य स शुद्धचेताः शुद्धचेतसि आत्मा स्वय
मेव स्फुरतीत्यर्थः अतएव यतितस्य ह्यर्थं वेदानुवचनाविहिताः तमेवं वेदानुवचनेन ब्राह्मणा वि
विदिषंति यज्ञेन दानेन तपसा अनाशकेनेति घटपटादयस्तु जडत्वात् प्रकाशांतरापेक्षा आत्मा तु

यएकोविभाति स्वतःशुद्धचेताः प्रकाशस्वरूपोपि नानेव धीषु शरावोदकस्थो यथा भानुरेकः स
प्रकाशरूपत्वात् प्रकाशांतरान्नपेक्षते प्रकाशते यथा सविता स्वप्रकाशाय प्रकाशांतरं नापेक्षते, यथा च प्र
काशते तद्वदात्मापीति भावः एवमुत्पन्ने ज्ञाने यद्वदुक्तः प्रकाशस्वरूपोपि परमार्थतो नाना धीषु नानेव
भासते सोहमात्मा शरावोदके घ्रणादिषु स्थितो यथा भानुरादित्यः प्रकाशरूपोपि एक एव स्वभावेन भा
ति तद्वत् आत्मापीति ननु कथमेक एवात्मा युगपदनेकां बुद्धीरनुतिष्ठति नह्येक एवाहं कोपि युगपदनेका ४

ञोपलभ्यते क्रमेण त्वधिष्ठानं युक्तं न चेह नास्ति युगपत्सर्वासां बुद्धीनां स्वव्यापारे प्रवृत्तिदर्शनात्
अधीनानां अन्यथाभावात् अतोनेकआत्मेत्यत आह : यथेति यथा येन प्रकारेण रविर्देवासौ एका
नेकेषां चक्षुषां प्रकाशो युगपदनेकचक्षुषां अधितिष्ठति नत्वेकस्मिंश्चक्षुषि प्रकाश्यं प्रकाशीकरोति

यथानेकचक्षुःप्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यं अनेका धियो यस्तथैक
प्रबोधः स नित्यो ॥ ४ ॥

तथा तेनैव प्रकारेणैक एवासौ प्रबोधश्चैव एकप्रबोधः अनेका धियो बुद्धीरधितिष्ठति युगप
त् न क्रमेणैकस्मिन्धिये प्रकाश्यं प्रकाशीकरोति सोहमात्मेति संबंधः न च वस्तुतर्हि रविरेव
बुद्ध्यादीनामधिष्ठाता किमभ्युपगम्यते इति तथा च श्रुतिः धियो यो नः प्रचोदयात् प्रेरयेत्
इत्यत आह विवस्वदिति ॥ ५ ॥

ह स्ता
९

विवस्वता आदित्येन प्रभातं प्रकाशितमित्यर्थः अधिचक्षुर्यथा रूपं घटपटादिरूपाणि
प्रकर्षेण जानाति नाभातं नाप्रकाशितं अंधकारेण घटाद्यनुपलंभात् एवं सन्निविवस्वा
नप्येकः तथा तेनैव प्रकारेण भातः प्रकाशितोधिष्ठितः समाभासयति अधितिष्ठति अ
क्षेच चक्षुर्यस्य विवस्वतो धिष्ठानं सोहमात्मेति सर्वसर्वेषां भूतानामधिष्ठाना श्रुत्य

विवस्वत्प्रकाशं यथा रूपमक्षं प्रशस्तानि नाभातमेवं विवस्वान् तथा भातमाभास
यत्समेकं सन्निज्योप १०

उं चक्षुरधिष्ठानमभिप्रेत्यत्र च्छेरकत्वं विवस्वतो बुद्धिप्रेरकत्वेनाभिहितं यस्माद्विवस्व
ताधिष्ठितं चक्षुर्बुद्धिमुत्पादयति ननु तर्हि प्रकाशान्तरेण अधिष्ठानव्य मात्मना न तस्य
प्रकाशकत्वात् नान्यतो स्ति दृष्टे तिम्भ्रान्त्या दृष्टान्तान्तरं प्रतिविध्यते किंच १०

यथा येन प्रकारेण आदित्य एको पुवारिषु चलासु स्थिरासु अनेको नानासन्नन त्वविभा
व्यस्वरूपः अनुअंचतीति गच्छतीत्यर्थः अत्र केनविभाव्यंस्वरूपंयस्यासनयोक्तः नवारिषु
विद्यते भवति किंतर्हि यथैव नभसि देदीप्यमानं तज्जले दृश्यत इत्यर्थः एवमेक आत्मा

यथा सूर्य एको प्यनेकश्चलासु स्थिरास्वप्यनन्वविभाव्य
स्वरूपः चलास्वप्यनेकासु धीष्वेक एव स नित्यो ११

चलासु नानाभूतासु बुद्धिषु अनेकः सन् अनन्वविभाव्यस्वरूपः न तु बुद्धिरनुगच्छति किं
तर्हि पृथग्देदीप्यते यः सो हमात्मेत्यर्थः अन्यदपि दृष्टांतमाह यथेति ११

ॐ

यथार्थेन प्रकारेण घनेन मेघेन तिरोहिता दृष्टिर्दर्शनं यस्य सः घनच्छन्नदृष्टिः पुरुषः
[illegible]त्वेनाज्ञेन यथार्थेन प्रकारेण घनच्छन्नदृष्टित्वात् तेन प्रकारेण जानाति निष्प्रभं प्रभा
रहितं अप्रकाशस्वरूपमिति यावत् मूर्खो हि मन्यते घनच्छन्नदृष्टित्वात् प्रकाशस्वरू

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धि ११

पमपि रविं निष्प्रकाशमहं पश्यामीति मूढोऽतिमूर्खः सवात्मनो दृष्टेरप्रकाशं सघनं
घनच्छन्नसूर्यमेवाप्रकाशं मन्यते च पादपूरणे तथा तेनैव प्रकारेण विमूढच्छन्नदृष्टिः
बुद्धिमान्नत्वेऽगृहीतत्वात् कर्तृदुःखादिकमात्मनि मन्यमानो बद्ध इति विचयो भाति [illegible]